

# एककम् - २

# जीवामृतम्।

जलम् अत्यन्तम् अमूल्यं भवति इति वयं जानीमः। अमूल्यस्य जलस्य परिरक्षणम् अस्माभिः कार्यम्। अस्मिन् एकके, एकं सम्भाषणं, जलस्य महत्त्वप्रतिपादकानि कानिचन सुभाषितानि, काचन कथा च अन्तर्भवन्ति।

# ३. हन्त ! अमृतमपि विषम् ।



जोसफः - भवति ! कुतोऽत्र तिष्ठसि ?

रजकस्त्री - पश्य, नदीजलं नितरां मलिनम्। कथम् अस्मिन् जले वस्त्रं प्रक्षालयामि? जलोपरि मृताः मत्स्याः दृश्यन्ते।

जोसफः - (*नदीसमीपं गत्वा जलं वीक्ष्य*) सत्यमेव। अहो! महान् दुर्गन्धः। अत्र स्नातुम् अशक्यम्। अहं गृहं प्रतिगच्छामि।

रजकस्त्री - अहमपि। (*उभौ गच्छतः। अभिमुखम् आगच्छन्तम् कमपि गोशाबकं दृष्ट्वा*) भो जोसफः! वत्सं तं निवारयतु। स नदीजलं पातुं गच्छति।

**पठनप्रवर्तनानि।**

नदीजलं मलिनं भवति। अतः स्नानं पानं प्रक्षालनं च मा करोतु इति जनान् बोधयितुं युक्तां भित्तिपत्रिकां (पोस्टर्) चर्चां कृत्वा रचयतु।

**श्रद्धेयाः अंशाः।**

- संक्षिप्तता।
- आशयव्यक्तता।
- आकर्षकता।



# 22



जलमलिनीकरणस्य परिहाराय ग्रामाध्यक्षस्य पुरतःसमर्पयितुं निवेदनमेकं सज्जीकरोतु।

**श्रद्धेयाः अंशाः।**

- विषयावबोधः।
- भाषाशैली।
- निवेदनस्य घटना।

चित्रं निरीक्ष्य धीवरस्य पुत्रस्य च भाषणं पूरयतु।

**श्रद्धेयाः अंशाः।**

- स्वाभाविकता।
- आशयव्यक्तता।
- वाक्यघटना।



पुत्रः - हे पितः! अहं भवन्तं प्रतीक्ष्यैव तिष्ठामि।

धीवरः - किं वा कारणम्?

पुत्रः - आगामिनि सप्ताहे मम विद्यालयात् विनोदयात्रार्थं सर्वे कन्याकुमारीं गमिष्यन्ति। अहमपि नाम दत्तवान्। शतं रूप्यकाणि श्वः एव देयानि।



धीवरः - पुत्र ! अद्य मत्स्यबन्धनं न अकरवम्।

पुत्रः - ........................................

धीवरः - ........................................



पट्टिकातः उचितपदानि स्वीकृत्य वाक्यानि रचयतु -

| | | | |
|---|---|---|---|
| बालः | जलं | वीक्ष्य | पठति |
| गजः | विद्यालयं | पातुं | स्नाति |
| वनिता | चित्रं | गत्वा | गच्छति |
| | नदीं | | लिखति |

**श्रद्धेयाः अंशाः।**

- आशयव्यक्तता।
- वाक्यघटना।

## अनुबन्धः।

**शब्दकोशः।**

| | | | |
|---|---|---|---|
| अमूल्यम् | यस्य मूल्यम् परिमातुम् अशक्यम् तत् | വിലമതിക്കാ- നാകാത്ത | invaluable |
| उपरि | ऊर्ध्वभागे | മുകളിൽ | on the top |
| कानिचन | कानिचित् | ചില, ഏതാനും | a few |
| जानीमः | अवगच्छामः | ഞങ്ങൾ അറിയുന്നു | we understand |
| नितरां | अत्यन्तम् | ഏറ്റവും | very much |
| परिरक्षणम् | संरक्षणम् | പരിപാലനം | look after/preserve |
| प्रक्षालयति | क्षालनं करोति | കഴുകുന്നു | washes off |
| रजकस्त्री | वस्त्रप्रक्षालिका | അലക്കുകാരി | washer woman |
| वत्सः | गोशावकः | പശുക്കുട്ടി | calf |
| वीक्ष्य | निरीक्ष्य | നോക്കിയിട്ട് | having looked |
| तुष्यति | हृष्यति | സന്തോഷിക്കുന്നു | expresses pleasure |



## धातुरूपावलिः।

**जानीमः - ज्ञा अवबोधने लट्. प. प. उ. पु. ब. व.।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु. | जानाति | जानीतः | जानन्ति |
| म.पु. | जानासि | जानीथः | जानीथ |
| उ.पु. | जानामि | जानीवः | जानीमः। |

**तिष्ठति - ष्ठा गतिनिवृत्तौ लट्. प. प. प्र. पु. ए. व.।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु. | तिष्ठति | तिष्ठतः | तिष्ठन्ति |
| म.पु. | तिष्ठसि | तिष्ठथः | तिष्ठथ |
| उ.पु. | तिष्ठामि | तिष्ठावः | तिष्ठामः। |

**गच्छति - गम्लृ गतौ लट्. प. प. प्र. पु. ए. व.।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु. | गच्छति | गच्छतः | गच्छन्ति |
| म.पु. | गच्छसि | गच्छथः | गच्छथ |
| उ.पु. | गच्छामि | गच्छावः | गच्छामः। |

## अव्ययपरिचयः।

गत्वा, दृष्ट्वा - (क्त्वान्ते)

सः नदीं गत्वा स्नाति।

शिशुः गजं दृष्ट्वा तुष्यति।

वीक्ष्य - (ल्यबन्तम्)

शिशुः मातरं वीक्ष्य मन्दं हसति।

पातुम् - (तुमुन्नन्तम्)

तृषार्तः जलं पातुं कूपसमीपं गच्छति।

*



# ४.जीवामृतम्।

**जलं जीवनमित्याहुः**
**जलमेव परं धनम्।**
**प्राणिनां जीवरक्षायै**
**जलमेव सहायकम्।।**

**पदच्छेदः।**

| | | |
|---|---|---|
| जीवनमित्याहुः | - | जीवनम् + इति + आहुः। |
| जलमेव | - | जलम् + एव। |

**अन्वयः** (जनाः) जलं जीवनम् इति आहुः। जलमेव परं धनम् (भवति)। जलमेव प्राणिनां जीवरक्षायै सहायकम्।

**आशयः** जनाः जलं जीवनोपायम् इति वदन्ति। तत् परमं धनम्। तत् प्राणिनां जीवरक्षणार्थं कल्पते।

**तृषां हरति लोकस्य**
**तोषयत्यनिशं जलम्।**
**जलं जीवस्य मूलं हि**
**भेषजं ह्युष्णशान्तये।।**

**पदच्छेदः।**

| | | |
|---|---|---|
| तोषयत्यनिशम् | - | तोषयति + अनिशम्। |
| ह्युष्णशान्तये | - | हि + उष्णशान्तये। |



**अन्वयः** जलं लोकस्य तृषां हरति। अनिशं तोषयति च। जलं जीवस्य मूलम् हि। उष्णशान्तये भेषजं हि।

**आशयः** जलं जीविनां पिपासां शमयति। तत् सदा सन्तोषप्रदायकं भवति। जलं जीवस्य आधारः। तापशमनार्थं जलम् औषधं भवति।

**अमृतं हि जलं प्राहुः**
**सर्वस्योर्जप्रदायकम्।**
**शीतलं सुखदं वस्तु**
**सर्वस्यार्तिहरं शुभम्।।**

**पदच्छेदः।**

सर्वस्योर्जप्रदायकम् - सर्वस्य + ऊर्जप्रदायकम्।
सर्वस्यार्तिहरम् - सर्वस्य + आर्तिहरम्।

**अन्वयः** सर्वस्य ऊर्जप्रदायकं जलम् अमृतं प्राहुः हि। (तद्) शीतलं सुखदं सर्वस्य आर्तिहरं शुभं (च) भवति।

**आशयः** सर्वस्य शक्तिदायकं जलम् अमृतं भवति। तद् शीतलं सुखदायकं च। शुभं तत् तृषार्तिं शमयति च।

**जलं स्नानाय पानाय**
**सस्यसंवर्धनाय च।**
**देवतातिथिपूजायै**
**पितॄणां तर्पणाय च।।**

**अन्वयः** जलं स्नानाय पानाय सस्यसंवर्धनाय देवतातिथिपूजायै पितॄणां तर्पणाय च (उपकरोति)।

**आशयः** जलं स्नानाय पानाय सस्यपोषणाय च उपकरोति। देवतानाम् अतिथीनां च पूजार्थं पितॄणां तोषणाय च अत्यन्तम् उपकारकं भवति।





**पठनप्रवर्तनानि ।**



सुभाषितानि तालानुसारम् आलपतु।

**श्रद्धेयाः अंशाः ।**

- उचिततालस्वीकारः।
- उच्चारणस्पष्टता।



सुभाषितानाम् आशयं स्वीकृत्य जलस्य प्राधान्यविषये भित्तिपत्रिकां (पोस्टर्) रचयतु।

**श्रद्धेयाः अंशाः ।**

- संक्षिप्तता।
- आशयव्यक्तता।
- आकर्षकता।



सुभाषितानाम् आशयानुसारं जलस्य प्राधान्यमधिकृत्य उपन्यासं रचयतु।

**श्रद्धेयाः अंशाः ।**

- विषयावबोधः।
- वाक्यघटना।
- उचितशीर्षकम्।

## अनुबन्धः ।

**शब्दकोशः ।**

| | | | |
|---|---|---|---|
| अनिशम् | सततम् | നിരന്തരം | incessantly |
| अमृतम् | पीयूषम् | അമൃത് | nectar/ambrosia |

# 28



| | | | |
|---|---|---|---|
| आर्तिहरम् | दुःखनाशकम् | ദുഃഖനാശകം | a thing that destroys sorrows |
| तर्पणम् | तोषणम् | സന്തോഷിപ്പിക്കൽ | pleasing/enjoyable |
| तृषा | पिपासा | ദാഹം | thirst |
| प्रदायकम् | दायकम् | നൽകുന്നത് | giving |
| भेषजम् | औषधम् | ഔഷധം | medicine |
| मूलम् | आधारः | അടിസ്ഥാനം | source |
| सुखदम् | सुखदायकम् | സുഖം നൽകുന്നത് | pleasure giving |
| हरति | दूरीकरोति | അകറ്റുന്നു | removes |

**धातुरूपावलिः।**

**आहुः - ब्रूञ् व्यक्तायां वाचि प. प. लट्. प्र. पु. ब. व.।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु. | ब्रवीति/आह | ब्रूतः/आहतुः | ब्रुवन्ति/आहुः |
| म.पु. | ब्रवीषि/आत्थ | ब्रूथः/आहथुः | ब्रूथ |
| उ.पु. | ब्रवीमि | ब्रूवः | ब्रूमः। |

*

# ५.सुजला सूरजा।



मथुरायां वृन्दावने कालिन्दी नाम नदी प्रवहति। तस्याः तीरे जनाः ससुखं वसन्ति। पुरा गरुडाद् भीतः सहस्रशीर्षः कालियः कालिन्दीनद्याः ह्रदम् अध्यवसत्। कालियस्य उग्रविषेण नदीजलं विषमयमभवत्। विषवायुना तीरस्थाः वृक्षलतादयः शुष्काः अभवन्। कदाचित् तस्याः



जलस्य पानेन गोपाः गावश्च मूर्छिताः। तदा जनाः तां दुरवस्थां गोपालाय श्रीकृष्णाय न्यवेदयन्। सः कालिन्दीं शुद्धां कर्तुं निश्चिनोति स्म। सः नदीतीरमासाद्य तत्रत्यं कदम्बवृक्षम् आरोहति स्म। वृक्षात् आप्लुत्य नद्यामपतच्च। तदा क्रुद्धः कालियः भोगेन श्रीकृष्णम् अवेष्टयत्। कृष्णस्तु तस्य शीर्षम् आरुह्य अनृत्यत्। परिक्षीणः कालियः रक्तमवमत्। तद्दृष्ट्वा तस्य परिवारः दुःखितः सन् श्रीकृष्णमुपगम्य कालियस्य मोचनाय प्रार्थयत। दयालुः सः कालियं मोचितवान्। सः कृष्णस्य आज्ञया सपरिवारः कालिन्दीं परित्यज्य रमणकद्वीपम् अगच्छत्। सूरजा पुनरपि सुजला अभवत्। तद्देशवासिनः गोपाः गावश्च यथापूर्वं ससुखं तत्रावसन् ।

**पठनप्रवर्तनानि।**

"कालियस्य परिवारः तस्य मोचनाय श्रीकृष्णं प्रार्थयत।" तयोः मिथः भाषणं संभाव्य लिखतु।

**श्रद्धेयाः अंशाः।**

- स्वाभाविकता।
- आशयव्यक्तता।
- वाक्यघटना।

कथां वार्तारूपेण परिवर्त्य लिखतु।

**श्रद्धेयाः अंशाः।**

- उचितशीर्षकम्।
- भाषाशैली।
- वाक्यघटना।

अधः दत्तानि वाक्यानि पठित्वा पाठान्तर्गतवाक्यैः सह तुलनं कृत्वा साधुतां परिशोधयतु।

1. कालियः गरुडं भीतः अभवत्।
2. कालियः नदीह्रदे अध्यवसत्।

3. श्रीकृष्णः कालियस्य शीर्षे आरुह्य अनृत्यत्।
4. कालियस्य परिवारः श्रीकृष्णम् उपगत्वा प्रार्थयत।

पट्टिकातः पदानि स्वीकृत्य यथोचितं वाक्यानि रचयतु।

| | | | | |
|---|---|---|---|---|
| | | अवतीर्य | आपणम् | अगच्छत् |
| रमेशः | बस्यानात् | आगत्य | कृषिकार्यम् | अकरोत् |
| | विद्यालयात् | | ग्रन्थशालाम् | |
| | | | गृहकार्यम् | |

**श्रद्धेयाः अंशाः।**

- वाक्यघटना।
- आशयव्यक्तता।

## अनुबन्धः।

**शब्दकोशः।**

| | | | |
|---|---|---|---|
| अनृत्यत् | नर्तनम् अकरोत् | നൃത്തംചെയ്തു | danced |
| अवमत् | वमति स्म | ഛർദ്ദിച്ചു | vomitted |
| आरुह्य | आरोहणं कृत्वा | കയറിയിട്ട് | having climbed up |
| आज्ञा | निर्देशः | കല്പന | order/command |
| आसाद्य | प्राप्य | പ്രാപിച്ചിട്ട് | having reached |
| उपगम्य | समीपं गत्वा | അടുത്തുചെന്നിട്ട് | having approached |
| कदम्बः | वृक्षविशेषः | കടമ്പുമരം | Kadampa tree |

# 32



| | | | |
|---|---|---|---|
| क्रुद्धः | कुपितः | കോപിഷ്ഠൻ | furious/angry |
| गावः | धेनवः | പശുക്കൾ | cows |
| जीवनम् | जीवनसाधनम् | ജീവിക്കാൻ അവശ്യം വേണ്ടത് | essential for life (water) |
| तद्देशवासिनः | तस्मिन् देशे वसन्तः | ആ ദേശത്ത് വസിക്കുന്നവർ | residents of a particular place |
| निर्गमनाय | बहिर्गमनाय | പുറത്തുപോകുവാൻ | to go out |
| न्यवेदयन् | निवेदयन्ति स्म | അറിയിച്ചു | reported |
| प्राणिनाम् | जीविनाम् | ജീവികളുടെ | of the creatures |
| परिक्षीणः | श्रान्तः | ക്ഷീണിതൻ | tired |
| भोगः | सर्पशरीरम् | സർപശരീരം | body of a snake |
| मूर्छिताः | मोहम् उपगताः | മോഹാലസ്യപ്പെട്ടവർ | unconscious ones |
| शीर्षम् | शिरः | തല | head |
| शुष्कः | शोषं गतः | ഉണങ്ങിയത് | dried |
| सपरिवारः | कुटुम्बसमेतः | കുടുംബസമേതൻ | with family |
| ह्रदः | अगाधजलाशयः | കയം | deep reservoir |

**पदच्छेदः ।**

विषमयमभवत् - विषमयम् + अभवत्।

गावश्च - गावः + च।

तीरमासाद्य - तीरम् + आसाद्य

अपतच्च - अपतत् + च।

कृष्णस्तु - कृष्णः + तु।





| | | |
|---|---|---|
| रक्तमवमत् | - | रक्तम् + अवमत्। |
| तद्दृष्ट्वा | - | तत् + दृष्ट्वा। |
| तत्रावसन् | - | तत्र + अवसन्। |

**विग्रहः।**

| | | |
|---|---|---|
| वृक्षलतादयः | - | वृक्षाः लताः आदयः येषां ते। |
| दुरवस्था | - | दुष्टा अवस्था। |
| गोपालः | - | गाः पालयति इति। |
| सूरजा | - | सूरात् जाता। (कालिन्दी) कालिन्दी सूर्यपुत्रीति प्रसिद्धिः। |

**शब्दरूपावलिः।**

**ओकारान्तः स्त्रीलिङ्गः गोशब्दः।**

| विभक्तिः | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| प्रथमा | गौः | गावौ | गावः |
| सं.प्रथमा | हे गौः | हे गावौ | हे गावः |
| द्वितीया | गां | गावौ | गाः |
| तृतीया | गवा | गोभ्यां | गोभिः |
| चतुर्थी | गवे | गोभ्यां | गोभ्यः |
| पञ्चमी | गोः | गोभ्यां | गोभ्यः |
| षष्ठी | गोः | गवोः | गवाम् |
| सप्तमी | गवि | गवोः | गोषु । |



## धातुरूपावलिः।

**अपतत् - पत्लृ गतौ लङ् प. प. प्र. पु. ए. व.**

| | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| प्र.पु. | अपतत् | अपतताम् | अपतन् |
| म.पु. | अपतः | अपततम् | अपतत |
| उ.पु. | अपतम् | अपताव | अपताम। |

## प्रयोगविशेषाः।

गरुडाद्भीतः - भयार्थकधातुयोगे पञ्चमी ।

ह्रदम् अध्यवसत् - अधिपूर्वक वस् धातोः योगेन सप्तम्याः स्थाने द्वितीया ।

आरोहति स्म - स्म योगे भूतार्थे लट् ।

## अव्ययपरिचयः।

आसाद्य - हनूमान् अशोकवनिकाम् आसाद्य सीताम् अपश्यत्।

आरुह्य - अहं विमानमारुह्य दिल्लीमगच्छम्।

उपगम्य - शिष्यः गुरुम् उपगम्य पुस्तकम् अपठत्।

आप्लुत्य - वानरः वृक्षात् आप्लुत्य अधावत्।

## अमरकोशः।

जलम् - आपःस्त्री भूम्नि वार्वारि सलिलं कमलं जलम्।
पयः कीलालममृतं जीवनं भुवनं वनम्।

शरीरम् - गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः।

सूर्यः - सूरसूर्यार्यमादित्य द्वादशात्मादिवाकराः।





**शब्दरूपावलिः।**

**उकारान्तः पुल्लिङ्गः शिशुः शब्दः।**

| विभक्तिः | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| प्र. | शिशुः | शिशू | शिशवः |
| स.प्र. | हे शिशो | हे शिशू | हे शिशवः |
| द्वि. | शिशुम् | शिशू | शिशून् |
| तृ. | शिशुना | शिशुभ्यां | शिशुभिः |
| च. | शिशवे | शिशुभ्यां | शिशुभ्यः |
| प. | शिशोः | शिशुभ्यां | शिशुभ्यः |
| ष. | शिशोः | शिश्वोः | शिशूनाम् |
| स. | शिशौ | शिश्वोः | शिशुषु। |

**तकारान्तः पुल्लिङ्गः महत् शब्दः।**

| विभक्तिः | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| प्र. | महान् | महान्तौ | महान्तः |
| स.प्र. | हे महान् | हे महान्तौ | हे महान्तः |
| द्वि. | महान्तं | महान्तौ | महतः |
| तृ. | महता | महद्भ्यां | महद्भिः |
| च. | महते | महद्भ्यां | महद्भ्यः |
| प. | महतः | महद्भ्यां | महद्भ्यः |
| ष. | महतः | महतोः | महताम् |
| स. | महति | महतोः | महत्सु। |



# किमार्जितम् ?



**निर्देशाः**

1. भित्तिपत्रम् अवसितं चेत् वृक्षे यावच्छक्यं पर्णानि लिख्यन्ताम्।
2. ग्रामाध्यक्षाय समर्पणीयं निवेदनं लिखितं चेत् धेनोः चित्रं वर्णेन लिप्यताम्।
3. सुभाषितानि तालानुसारम् आलपितानि चेत् वत्सस्य चित्रं वर्णेन लिप्यताम्।
4. कालियपरिवारस्य कृष्णस्य च मिथः भाषणं लिखितं चेत् वृक्षे पुष्पाणि रच्यन्ताम्।
5. पट्टिकातः पदानि स्वीकृत्य वाक्यानि लिखितानि चेत् गोपस्य चित्रं वर्णेन लिप्यताम्।

✱